# Sarasvati Stotram

# સરસ્વતીસ્તોત્રમ્

## Document Information

Text title : Sarasvati Stotram

File name : sarasvatIstotram.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, sarasvatI

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# સરસ્વતીસ્તોત્રમ્

જુષસ્વ બાલવાક્યવત્સ્તવં મમામ્બ ભારતી ।
અસત્સદપ્યદસ્ત્વયિ ભ્રમાદ્વિભાતિ કેવલે ॥ ૧॥

ક્ષરાક્ષરાત્પરં હિ યત્ત્વમેવ તત્પદં ધ્રુવમ્ ।
જલે યથોર્મિબુદ્બુદાસ્તથા ત્વયીશજીવદૃક્ ॥ ૨॥

ત્ર્યધીશ ઓઙ્કૃતેઽખિલં ત્વમેવ ચાસ્ય મઙ્ગલમ્ ।
યદર્ધમાત્રમૂર્જિતં ક્રિયાવિકારવર્જિતમ્ ॥ ૩॥

ત્રિસપ્તયાગસાધિકે સુભુક્તિમુક્તિદાયકે ।
સ્વરાર્ણકારણે સ્તવઃ સ્વયં નુ કૈઃ કૃતસ્તવ ॥ ૪॥

પ્રકાશકપ્રકાશકે શ્રુતિશ્રુતાદિધારકે ।
ત્વમેવ સર્વકારણં ત્વમેવ સર્વતારણમ્ ॥ ૫॥

સુશક્તભક્તભાવિતં હિ તેન સર્વથા તતમ્ ।
તદેવ ધામ તે વરં યદીક્ષ્યતે બુધૈઃ પરમ્ ॥ ૬॥

સ્થિરાશ્ચરાશ્ચ ગોચરાઃ પરત્ર ચાત્ર વાઽમ્બ યે ।
ત્વદેવ તત્સમાગમઃ પ્રમાણમત્ર ચાગમઃ ॥ ૭॥

નમોઽસ્તુ તે સરસ્વતિ ધ્યવિત્રિ વાજિનીવતિ ।
પ્રસીદ બુદ્ધિચેતને સ્વભક્તહૃન્નિકેતને ॥ ૮॥

સ્તુતૈવં વિષ્ણુજિહ્વા સા પ્રસન્ના સૂનૃતેરકા ।
પ્રાહાવિષ્કૃત ચાત્માનં તુષ્ટાસ્મિ વરયેપ્સિતમ્ ॥ ૯॥

સકમ્બલસ્ય કુરુ મે સહાયં શમ્ભુગાયને ।
સુસ્વરત્વાદિ યચ્છેતિ યયાચેઽહિઃ સરસ્વતીમ્ ॥ ૧૦॥

વાગીશાહોભયોરસ્તુ દિવ્યનાદરહસ્યમિત્ ।
સ્તોત્રં ચાસ્તુ સ્ખલદ્ધીષ્વ્ધીજાડ્યાદિહરં ત્વિદમ્ ॥ ૧૧॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં સરસ્વતીસ્તોત્રં સમ્પૂર્ણમ્ ।

*Sarasvati Stotram*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*